# Shri Mallikarjuna Suprabhatam

# શ્રીમલ્લિકાર્જુનસુપ્રભાતમ્

## Document Information

Text title : Mallikarjuna Suprabhatam

File name : mallikArjunasuprabhAtam.itx

Category : shiva, suprabhAta

Location : doc_shiva

Proofread by : PSA Easwaran

Latest update : July 7, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીમલ્લિકાર્જુનસુપ્રભાતમ્

પ્રાતસ્સ્મરામિ ગણનાથમનાથબન્ધું
સિન્દૂરપૂરપરિશોભિતગણ્ડયુગ્મમ્ ।
ઉદ્દણ્ડવિઘ્નપરિખણ્ડનચણ્ડદણ્ડ-
માખણ્ડલાદિસુરનાયકવૃન્દવન્દ્યમ્ ॥ ૧॥

કલાભ્યાં ચૂડાલઙ્કૃતશશિકલાભ્યાં નિજતપઃ
ફલાભ્યાં ભક્તેષુ પ્રકટિતફલાભ્યાં ભવતુ મે ।
શિવાભ્યામાસ્તીકત્રિભુવનશિવાભ્યાં હૃદિ પુન-
ર્ભવાભ્યામાનન્દસ્ફુરદનુભવાભ્યાં નતિરિયમ્ ॥ ૨॥

નમસ્તે નમસ્તે મહાદેવ! શમ્ભો!
નમસ્તે નમસ્તે દયાપૂર્ણસિન્ધો!
નમસ્તે નમસ્તે પ્રપન્નાત્મબન્ધો!
નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૩॥

શશ્વચ્છ્રીગિરિમૂર્ધનિ ત્રિજગતાં રક્ષાકૃતૌ લક્ષિતાં
સાક્ષાદક્ષતસત્કટાક્ષસરણિશ્રીમત્સુધાવર્ષિણીમ્ ।
સોમાર્ધાઙ્કિતમસ્તકાં પ્રણમતાં નિસ્સીમસમ્પત્પ્રદાં
સુશ્લોકાં ભ્રમરામ્બિકાં સ્મિતમુખીં શમ્ભોસ્સખીં ત્વાં સ્તુમઃ ॥ ૪॥

માતઃ! પ્રસીદ, સદયા ભવ, ભવ્યશીલે !
લીલાલવાકુલિતદૈત્યકુલાપહારે !
શ્રીચક્રરાજનિલયે ! શ્રુતિગીતકીર્તે !
શ્રીશૈલનાથદયિતે ! તવ સુપ્રભાતમ્ ॥ ૫॥

શમ્ભો ! સુરેન્દ્રનુત ! શઙ્કર ! શૂલપાણે !
ચન્દ્રાવતંસ ! શિવ ! શર્વ ! પિનાકપાણે !
ગઙ્ગાધર ! ક્રતુપતે ! ગરુડધ્વજાપ્ત !
શ્રીમલ્લિકાર્જુન વિભો ! તવ સુપ્રભાતમ્ ॥ ૬॥

વિશ્વેશ ! વિશ્વજનસેવિત ! વિશ્વમૂર્તે !
વિશ્વમ્ભર ! ત્રિપુરભેદન ! વિશ્વયોને !
ફાલાક્ષ ! ભવ્યગુણ ! ભોગિવિભૂષણેશ !
શ્રીમલ્લિકાર્જુન વિભો ! તવ સુપ્રભાતમ્ ॥ ૭॥

કલ્યાણરૂપ ! કરુણાકર ! કાલકણ્ઠ !
કલ્પદ્રુમપ્રસવપૂજિત ! કામદાયિન્ !
દુર્નીતિદૈત્યદલનોદ્યત ! દેવ દેવ !
શ્રીમલ્લિકાર્જુન વિભો ! તવ સુપ્રભાતમ્ ॥ ૮॥

ગૌરીમનોહર ! ગણેશ્વરસેવિતાઙ્ઘ્રે !
ગન્ધર્વયક્ષસુરકિન્નરગીતકીર્તે !
ગણ્ડાવલમ્બિફણિકુણ્ડલમણ્ડિતાસ્ય !
શ્રીમલ્લિકાર્જુન વિભો ! તવ સુપ્રભાતમ્ ॥ ૯॥

નાગેન્દ્રભૂષણ ! નિરીહિત ! નિર્વિકાર !
નિર્માય ! નિશ્ચલ ! નિરર્ગલ ! નાગભેદિન્ ।
નારાયણીપ્રિય ! નતેષ્ટદ ! નિર્મલાત્મન્ !
શ્રીપર્વતાધિપ ! વિભો ! તવ સુપ્રભાતમ્ ॥ ૧૦॥

સૃષ્ટં ત્વયૈવ જગદેતદશેષમીશ !
રક્ષાવિધિશ્ચ વિધિગોચર ! તાવકીનઃ ।
સંહારશક્તિરપિ શઙ્કર ! કિઙ્કરી તે
શ્રીશૈલશેખર વિભો ! તવ સુપ્રભાતમ્ ॥ ૧૧॥

એકસ્ત્વમેવ બહુધા ભવ ! ભાસિ લોકે
નિશ્શઙ્કધીર્વૃષભકેતન ! મલ્લિનાથ !
શ્રીભ્રામરીપ્રય ! સુખાશ્રય ! લોકનાથ !
શ્રીશૈલશેખર વિભો ! તવ સુપ્રભાતમ્ ॥ ૧૨॥

પાતાલગાઙ્ગજલમજ્જનનિર્મલાઙ્ગાઃ
ભસ્મત્રિપુણ્ડ્રસમલઙ્કૃતફાલભાગાઃ ।
ગાયન્તિ દેવમુનિભક્તજના ભવન્તં
શ્રીમલ્લિકાર્જુન વિભો ! તવ સુપ્રભાતમ્ ॥ ૧૩॥

સારસ્વતામ્બુયુતભોગવતીશ્રિતાયાઃ

બ્રહ્મેશવિષ્ણુગિરિચુમ્બિતકૃષ્ણવેણ્યાઃ ।
સોપાનમાર્ગમધિરુહ્ય ભજન્તિ ભક્તાઃ
શ્રીમલ્લિકાર્જુન વિભો ! તવ સુપ્રભાતમ્ ॥ ૧૪॥

શ્રીમલ્લિકાર્જુનમહેશ્વરસુપ્રભાત-
સ્તોત્રં પઠન્તિ ભુવિ યે મનુજાઃ પ્રભાતે ।
તે સર્વ સૌખ્યમનુભૂય પરાનવાપ્યં
શ્રીશામ્ભવં પદમવાપ્ય મુદં લભન્તે ॥ ૧૫॥

ઇતિ શ્રીમલ્લિકાર્જુનસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shri Mallikarjuna Suprabhatam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*